॥ ब्रह्मसूत्राणि ॥

brahmasuutraaNi[1]

ॐ

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

॥ अथ प्रथमोऽध्यायः॥

ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥१.१.१॥
ॐ जन्माद्यस्य यतः ॐ ॥१.१.२॥
ॐ शास्त्रयोनित्त्वात् ॐ ॥१.१.३॥
ॐ तत्तुसमन्वयात् ॐ ॥१.१.४॥
ॐ ईक्षतेर्नाशब्दम् ॐ ॥१.१.५॥
ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥१.१.६॥
ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ॥१.१.७॥
ॐ हेयवत्त्वावचनाच्च ॐ ॥१.१.८॥
ॐ स्वाव्ययात् ॐ ॥१.१.९॥
ॐ गतिसामान्यात् ॐ ॥१.१.१०॥
ॐ श्रुतत्त्वाच्च ॐ ॥१.१.११॥
ॐ आनन्दमयोऽभ्यासात् ॐ ॥१.१.१२॥
ॐ विकारशब्दान्नेतिचेन्न प्राचुर्यात् ॐ ॥१.१.१३॥
ॐ तद्धेतुव्यपदेशाच्च ॐ ॥१.१.१४॥
ॐ मान्त्रवर्णिकमेव च गीयते ॐ ॥१.१.१५॥
ॐ नेतरोऽनुपपत्तेः ॐ ॥१.१.१६॥
ॐ भेदव्यपदेशाच्च ॐ ॥१.१.१७॥
ॐ कामाच्च नानुमानापेक्षा ॐ ॥१.१.१८॥
ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥१.१.१९॥
ॐ अंतस्तद्धर्मोपदेशात् ॐ ॥१.१.२०॥
ॐ भेदव्यपदेशच्चान्यः ॐ ॥१.१.२१॥
ॐ आकाशस्तल्लिङ्गात् ॐ ॥१.१.२२॥
ॐ अत एव प्राणः ॐ ॥१.१.२३॥
ॐ ज्योतिश्चरणाभिधानात् ॐ ॥१.१.२४॥
ॐ छन्दोऽभिधानान्नेतिचेन्न तथाचेतोऽर्पणनिगदात्तथा हि दर्शनम् ॐ ॥१.१.२५॥
ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॐ ॥१.१.२६॥
ॐ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ॐ ॥ १.१.२७॥
ॐ प्राणस्तथानुगमात् ॐ ॥१.१.२८॥
ॐ नवक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ॐ ॥१.१.२९॥
ॐ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॐ ॥१.१.३०॥
ॐ जीवमुख्यप्राणलिङ्गान्नेति
चेन्नोपासत्रैविध्यादाश्रितत्त्वादिह तद्योगात् ॐ ॥१.१.३१॥

[1] Send corrections to shrao@nyx.net (Shrisha Rao)

Three sets of numbers for each line correspond to adhyaaya, paada, and suutra, respectively.

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
प्रथमाध्यायस्य प्रथमः पादः समाप्तः

ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥१.२.१॥
ॐ विवक्षितगुणोपपत्तेश्च ॐ ॥१.२.२॥
ॐ अनुपपत्तेस्तु न शरीरः ॐ ॥१.२.३॥
ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥१.२.४॥
ॐ शब्दविशेषात् ॐ ॥१.२.५॥
ॐ स्मृतेश्च ॐ ॥१.२.६॥
ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेतिचेन्न निचाय्यत्वादेवं व्यौमवच्च ॐ ॥१.२.७॥
ॐ संभोगप्राप्तिरिति चेन्नवशेष्यात् ॐ ॥१.२.८॥
ॐ अत्ता चराचरग्रहणात् ॐ ॥१.२.९॥
ॐ प्रकरणाच्च ॐ ॥१.२.१०॥
ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥१.२.११॥
ॐ विशेषणाच्च ॐ ॥१.२.१२॥
ॐ अन्तरोपपत्तेः ॐ ॥१.२.१३॥
ॐ स्थानादिव्यपदेशाच्च ॐ ॥१.२.१४॥
ॐ सुखविशिष्टाभिधानादेव च ॐ ॥१.२.१५॥
ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ ॥१.२.१६॥
ॐ अनवस्थितेरसंभवाच्च नेतरः ॐ ॥१.२.१७॥
ॐ अन्तर्यामी अधिदैवादिषु तद्धर्मव्यपदेशात् ॐ ॥१.२.१८॥
ॐ न च स्मार्त अतद्धर्माभिपालात् ॐ ॥१.२.१९॥
ॐ शरीरश्चोभयेऽपि हि भेदेनैनमधीयते ॐ ॥१.२.२०॥
ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥१.२.२१॥
ॐ विशेषणभेदव्यपदेशाभ्यां नेतरौ ॐ ॥१.२.२२॥
ॐ रूपोपन्यासाच्च ॐ ॥१.२.२३॥
ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ ॥१.२.२४॥
ॐ स्मर्यमाणमनुमानं स्यादिति ॐ ॥१.२.२५॥
ॐ शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेतिचेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॐ ॥१.२.२६॥
ॐ अत एव न देवता भूतं च ॐ ॥१.२.२७॥
ॐ साक्षादप्यविरोधं जैमिनिः ॐ ॥१.२.२८॥
ॐ अभिव्यक्तेरित्याश्मरथ्यः ॐ ॥१.२.२९॥
ॐ अनुस्मृतेर्बादरिः ॐ ॥१.२.३०॥
ॐ संपत्तेरिति जैमिनिः तथा हि दर्शयति ॐ ॥१.२.३१॥
ॐ आमनन्ति चैनमस्मिन् ॐ ॥१.२.३२॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
प्रथमाध्यायस्य द्वितीयः पादः समाप्तः

ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥१.३.१॥
ॐ मुक्तोपसृप्यव्यपदेशात् ॐ ॥१.३.२॥
ॐ नानुमानमतच्छब्दात् ॐ ॥१.३.३॥
ॐ प्राणभृच्च ॐ ॥१.३.४॥

ॐ भेदव्यपदेशात् ॐ ॥१.३.५॥
ॐ प्रकरणात् ॐ ॥१.३.६॥
ॐ स्थित्यदनाभ्यां च ॐ ॥१.३.७॥
ॐ भूमा संप्रसादादध्युपदेशात् ॐ ॥१.३.८॥
ॐ धर्मोपपत्तेश्च ॐ ॥१.३.९॥
ॐ अक्षरमम्बरान्तधृते ॐ ॥१.३.१०॥
ॐ सा च प्रशासनात् ॐ ॥१.३.११॥
ॐ अन्यभावव्यावृत्तेश्च ॐ ॥१.३.१२॥
ॐ ईक्षितिकर्मव्यपदेशात् सः ॐ ॥१.३.१३॥
ॐ दहरोत्तरेभ्यः ॐ ॥१.३.१४॥
ॐ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॐ ॥१.३.१५॥
ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॐ ॥१.३.१६॥
ॐ प्रसिद्धेश्च ॐ ॥१.३.१७॥
ॐ इतरपरामर्शात्सेति चेन्नासम्भवात् ॐ ॥१.३.१८॥
ॐ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॐ ॥१.३.१९॥
ॐ अन्यार्थश्च परामर्शः ॐ ॥१.३.२०॥
ॐ अल्पश्रुतेरिति चेत्तदुक्तम् ॐ ॥१.३.२१॥
ॐ अनुकृतेस्तस्य च ॐ ॥१.३.२२॥
ॐ अपि च स्मर्यते ॐ ॥१.३.२३॥
ॐ शब्दादेव प्रमितः ॐ ॥१.३.२४॥
ॐ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॐ ॥१.३.२५॥
ॐ तदुपर्यपि बादरायणस्संभवात् ॐ ॥१.३.२६॥
ॐ विरोधः कर्मणीति चेदनेकप्रतिपत्तेर्दर्शनात् ॐ ॥ १.३.२७॥
ॐ शब्देतिचेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॐ ॥ १.३.२८॥
ॐ अत एव च नित्यत्वम् ॐ ॥१.३.२९॥
ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॐ ॥१.३.३०॥
ॐ मध्वादिष्वसंभवादनधिकारं जैमिनिः ॐ ॥१.३.३१॥
ॐ ज्योतिषि भावाच्च ॐ ॥१.३.३२॥
ॐ भावंतु बादरायणरस्ति हि ॐ ॥१.३.३३॥
ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॐ ॥ १.३.३४॥
ॐ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॐ ॥१.३.३५॥
ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ ॥१.३.३६॥
ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ ॥१.३.३७॥
ॐ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ ॥१.३.३८॥
ॐ कम्पनात् ॐ ॥१.३.३९॥
ॐ ज्योतिर्दर्शनात् ॐ ॥१.३.४०॥
ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ ॥१.३.४१॥
ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ ॥१.३.४२॥
ॐ पत्यादिशब्देभ्यः ॐ ॥१.३.४३॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
प्रथमाध्यायस्य तृतीयः पादः समाप्तः

ॐ आनुमानिकमप्येकेषामिति चेन्न
शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॐ ॥१.४.१॥
ॐ सूक्ष्मं तु तदर्हत्वात् ॐ ॥१.४.२॥
ॐ तदधीनत्वादर्थवत् ॐ ॥१.४.३॥
ॐ ज्ञेयत्वावचनाच्च ॐ ॥१.४.४॥
ॐ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॐ ॥१.४.५॥
ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ ॥१.४.६॥
ॐ महद्वच्च ॐ ॥१.४.७॥
ॐ चमसवदविशेषात् ॐ ॥१.४.८॥
ॐ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॐ ॥१.४.९॥
ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ ॥१.४.१०॥
ॐ न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॐ ॥ १.४.११॥
ॐ प्राणादयो वाक्यशेषात् ॐ ॥१.४.१२॥ ॐ
ॐ ज्योतिषैकेषामसत्यन्ने ॐ ॥१.४.१३॥
ॐ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॐ ॥ १.४.१४॥
ॐ समाकर्षात् ॐ ॥१.४.१५॥
ॐ जगद्वाचित्वात् ॐ ॥१.४.१६॥
ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्न तद्व्याख्यातम् ॐ ॥ १.४.१७॥
ॐ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ ॥१.४.१८॥
ॐ वाक्यान्वयात् ॐ ॥१.४.१९॥
ॐ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॐ ॥१.४.२०॥
ॐ उत्क्रमिष्यत एवंभावादित्यौदुलोमिः ॐ ॥१.४.२१॥
ॐ अवस्थितेरिति काशकृत्स्नः ॐ ॥१.४.२२॥
ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ ॥१.४.२३॥
ॐ अभिध्योपदेशाच्च ॐ ॥१.४.२४॥
ॐ साक्षाच्चोभयाम्नानात् ॐ ॥१.४.२५॥
ॐ आत्मकृतेः परिणामात् ॐ ॥१.४.२६॥
ॐ योनिश्च हि गीयते ॐ ॥१.४.२७॥
ॐ एतेन सर्वे व्याख्याताव्याख्याताः ॐ ॥१.४.२८॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
प्रथमाध्यायस्य चतुर्थः पादः समाप्तः

॥ इति प्रथमोऽध्यायः॥

॥ अथ द्वितीयोऽध्यायः॥

ॐ स्मृत्यनवकाशदोषप्रसङ्गेति
चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ ॥२.१.१॥
ॐ इतरेषां चानुपलब्धेः ॐ ॥२.१.२॥
ॐ एतेन योगः प्रत्युक्तः ॐ ॥२.१.३॥
ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥२.१.४॥
ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॐ ॥२.१.५॥

ॐ दृश्यते तु ॐ ॥ २.१.६॥
ॐ असदिति चेन्न प्रतिषेधमात्रत्वात् ॐ ॥ २.१.७॥
ॐ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॐ ॥ २.१.८॥
ॐ न तु दृष्टान्तभावात् ॐ ॥ २.१.९॥
ॐ स्वपक्षदोषाच्च ॐ ॥ २.१.१०॥
ॐ तर्काप्रतिष्ठानादपि अन्यथानुमेयमिति
चेदेवमप्यविमोक्षप्रसङ्गः ॐ ॥ २.१.११॥
ॐ एतेन शिष्टापरिग्रहाऽपि व्याख्याताः ॐ ॥ २.१.१२॥
ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ २.१.१३॥
ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥ २.१.१४॥
ॐ भावे चोपलब्धेः ॐ ॥ २.१.१५॥
ॐ सत्त्वाच्चावरस्य ॐ ॥ २.१.१६॥
ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥
२.१.१७॥
ॐ युक्तेः शब्दान्तराच्च ॐ ॥ २.१.१८॥
ॐ पटवच्च ॐ ॥ २.१.१९॥
ॐ यथा च प्राणादि ॐ ॥ २.१.२०॥
ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥ २.१.२१॥
ॐ अधिकं तु भेदनिर्देशात् ॐ ॥ २.१.२२॥
ॐ अश्मादिवच्च तदनुपपत्तिः ॐ ॥ २.१.२३॥
ॐ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॐ ॥ २.१.२४॥
ॐ देवादिवदपि लोके ॐ ॥ २.१.२५॥
ॐ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॐ ॥ २.१.२६॥
ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥ २.१.२७॥
ॐ आत्मनि चैवं विचित्राश्च हि ॐ ॥ २.१.२८॥
ॐ स्वपक्षदोषाच्च ॐ ॥ २.१.२९॥
ॐ सर्वोपेता च तद्दर्शनात् ॐ ॥ २.१.३०॥
ॐ विकरणत्वान्नेतिचेत्तदुक्तम् ॐ ॥ २.१.३१॥
ॐ न प्रयोजनत्त्वात् ॐ ॥ २.१.३२॥
ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥ २.१.३३॥
ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥
२.१.३४॥
ॐ कर्माविभागादिति चेन्नानादित्वात् ॐ ॥ २.१.३५॥
ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥ २.१.३६॥
ॐ सर्वधर्मोपपत्तेश्च ॐ ॥ २.१.३७॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
द्वितीयाध्यायस्य प्रथमः पादः समाप्तः

ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥ २.२.१॥
ॐ प्रवृत्तेश्च ॐ ॥ २.२.२॥
ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥ २.२.३॥
ॐ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥ २.२.४॥
ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ ॥ २.२.५॥
ॐ अभ्युपगमेऽप्यर्थाभावात् ॐ ॥ २.२.६॥
ॐ पुरुषाश्मवदितिचेत्तथापि ॐ ॥ २.२.७॥
ॐ अङ्गित्वानुपपत्तेश्च ॐ ॥ २.२.८॥
ॐ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॐ ॥ २.२.९॥
ॐ विप्रतिषेधाच्चासमञ्जसम् ॐ ॥ २.२.१०॥
ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥ २.२.११॥
ॐ उभयथापि न कर्मातस्तदभावः ॐ ॥ २.२.१२॥
ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥ २.२.१३॥
ॐ नित्यमेव च भावात् ॐ ॥ २.२.१४॥
ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ ॥ २.२.१५॥
ॐ उभयथा च दोषात् ॐ ॥ २.२.१६॥
ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ ॥ २.२.१७॥
ॐ समुदायोभयहेतुकेऽपि तदप्राप्तिः ॐ ॥ २.२.१८॥
ॐ इतरेतरप्रत्ययत्वादिति चेन्नौत्पत्तिमात्र निमित्तत्वात् ॐ
॥ २.२.१९॥
ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ ॥ २.२.२०॥
ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॐ ॥ २.२.२१॥
ॐ प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिः अविच्छेदात् ॐ ॥
२.२.२२॥
ॐ उभयथा च दोषात् ॐ ॥ २.२.२३॥
ॐ आकाशे चाविशेषात् ॐ ॥ २.२.२४॥
ॐ अनुस्मृतेश्च ॐ ॥ २.२.२५॥
ॐ नासतः अदृष्टत्वात् ॐ ॥ २.२.२६॥
ॐ उदासीनानामपि चैवं सिद्धिः ॐ ॥ २.२.२७॥
ॐ नाभावः उपलब्धेः ॐ ॥ २.२.२८॥
ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ ॥ २.२.२९॥
ॐ न भावरनुपलब्धेः ॐ ॥ २.२.३०॥
ॐ क्षणिकत्वाच्च ॐ ॥ २.२.३१॥
ॐ सर्वथानुपपत्तेश्च ॐ ॥ २.२.३२॥
ॐ नैकस्मिन् असम्भवात् ॐ ॥ २.२.३३॥
ॐ एवं चात्माकात्स्न्र्यम् ॐ ॥ २.२.३४॥
ॐ न च पर्यायादप्यविरोधः विकारादिभ्यः ॐ ॥ २.२.३५॥
ॐ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॐ ॥ २.२.३६॥
ॐ पत्युरसामञ्जस्यात् ॐ ॥ २.२.३७॥
ॐ संबन्धानुपपत्तेश्च ॐ ॥ २.२.३८॥
ॐ अधिष्ठानानुपपत्तेश्च ॐ ॥ २.२.३९॥
ॐ करणवच्चेन्न भोगादिभ्यः ॐ ॥ २.२.४०॥
ॐ अन्तवत्त्वमसर्वज्ञता वा ॐ ॥ २.२.४१॥
ॐ उत्पत्त्यसम्भवात् ॐ ॥ २.२.४२॥
ॐ न च कर्तुः करणम् ॐ ॥ २.२.४३॥
ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ ॥ २.२.४४॥
ॐ विप्रतिषेधाच्च ॐ ॥ २.२.४५॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः

ॐ न वियदश्रुतेः ॐ ॥ २.३.१॥
ॐ अस्ति तु ॐ ॥ २.३.२॥
ॐ गौणी असम्भवात् ॐ ॥ २.३.३॥
ॐ शब्दाच्च ॐ ॥ २.३.४॥

ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ ॥ २.३.५ ॥
ॐ प्रतिज्ञाऽहानिर्व्यतिरेकाच्छब्देभ्यः ॐ ॥ २.३.६ ॥
ॐ यावद्विकारं तु विभागो लोकवत् ॐ ॥ २.३.७ ॥
ॐ एतेन मातरिश्वा व्याख्यातः ॐ ॥ २.३.८ ॥
ॐ असम्भवस्तु सतरनुपपत्तेः ॐ ॥ २.३.९ ॥
ॐ तेजोऽतस्तथा ह्याह ॐ ॥ २.३.१० ॥
ॐ आपः ॐ ॥ २.३.११ ॥
ॐ पृथिवी अधिकाररूपशब्दान्तरेभ्यः ॐ ॥ २.३.१२ ॥
ॐ तदभिध्यानादेव तु तल्लिङ्गात् सः ॐ ॥ २.३.१३ ॥
ॐ विपर्ययेण तु क्रमोऽतः उपपद्यते च ॐ ॥ २.३.१४ ॥
ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति
चेन्नाविशेषात् ॐ ॥ २.३.१५ ॥
ॐ चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तः
तद्भावभावित्वात् ॐ ॥ २.३.१६ ॥
ॐ नात्मा अश्रुतेर्नित्यत्वाच्च ताभ्यः ॐ ॥ २.३.१७ ॥
ॐ ज्ञोऽत एव ॐ ॥ २.३.१८ ॥
ॐ उत्क्रान्तिगत्यागतीनाम् ॐ ॥ २.३.१९ ॥
ॐ स्वात्मना चोत्तरयोः ॐ ॥ २.३.२० ॥
ॐ नाणुरच्छ्रुतेरिति चेन्न इतराधिकारात् ॐ ॥ २.३.२१ ॥
ॐ स्वशब्दोन्मानाभ्यां च ॐ ॥ २.३.२२ ॥
ॐ अविरोधश्चन्दनवत् ॐ ॥ २.३.२३ ॥
ॐ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृद्धि हि ॐ ॥
२.३.२४ ॥
ॐ गुणाद्वा लोकवत् ॐ ॥ २.३.२५ ॥
ॐ व्यतिरेको गन्धवत् ॐ ॥ २.३.२६ ॥
ॐ तथा च दर्शयति ॐ ॥ २.३.२७ ॥
ॐ पृथगुपदेशात् ॐ ॥ २.३.२८ ॥
ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ ॥ २.३.२९ ॥
ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ ॥ २.३.३० ॥
ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ ॥ २.३.३१ ॥
ॐ नित्यापलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा
ॐ ॥ २.३.३२ ॥
ॐ कर्ता शास्त्रार्थवत्त्वात् ॐ ॥ २.३.३३ ॥
ॐ विहारोपदेशात् ॐ ॥ २.३.३४ ॥
ॐ उपादानात् ॐ ॥ २.३ ३५ ॥
ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ ॥
२.३.३६ ॥
ॐ उपलब्धिवदनियमः ॐ ॥ २.३.३७ ॥
ॐ शक्तिविपर्ययात् ॐ ॥ २.३.३८ ॥
ॐ समाध्यभावाच्छ ॐ ॥ २.३.३९ ॥
ॐ यथा च तक्षोभयथा ॐ ॥ २.३.४० ॥
ॐ परात्तु तच्छ्रुतेः ॐ ॥ २.३.४१ ॥
ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॐ ॥
२.३.४२ ॥
ॐ अंशो नानाव्यपदेशादन्यथा चापि
दाशकितवादित्वमधीयत एके ॐ ॥ २.३.४३ ॥
ॐ मन्त्रवर्णाच्च ॐ ॥ २.३.४४ ॥
ॐ अपि च स्मर्यते ॐ ॥ २.३.४५ ॥
ॐ प्रकाशादिवन्नैवं परः ॐ ॥ २.३.४६ ॥
ॐ स्मरन्ति च ॐ ॥ २.३.४७ ॥
ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ ॥
२.३.४८ ॥
ॐ असन्ततेश्चाव्यतिकरः ॐ ॥ २.३.४९ ॥
ॐ आभास एव च ॐ ॥ २.३.५० ॥
ॐ अदृष्टानियमात् ॐ ॥ २.३.५१ ॥
ॐ अभिसंध्यादिष्वपि चैवम् ॐ ॥ २.३.५२ ॥
ॐ प्रदेशादिति चेन्नान्तर्भावात् ॐ ॥ २.३.५३ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
द्वितीयाध्यायस्य तृतीयः पादः समाप्तः

ॐ तथा प्राणाः ॐ ॥ २.४.१ ॥
ॐ गौण्यसम्भवात् ॐ ॥ २.४.२ ॥
ॐ तत्प्राक्श्रुतेश्च ॐ ॥ २.४.३ ॥
ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ २.४.४ ॥
ॐ सप्त गतेर्विशेषितत्वाच्च ॐ ॥ २.४.५ ॥
ॐ हस्तादयस्तु स्थितेऽतो नैवम् ॐ ॥ २.४.६ ॥
ॐ अणवश्च ॐ ॥ २.४.७ ॥
ॐ श्रेष्ठश्च ॐ ॥ २.४.८ ॥
ॐ न वायुक्रिये पृथगुपदेशात् ॐ ॥ २.४.९ ॥
ॐ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॐ ॥ २.४.१० ॥
ॐ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॐ ॥ २.४.११ ॥
ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ २.४.१२ ॥
ॐ अणुश्च ॐ ॥ २.४.१३ ॥
ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥ २.४.१४ ॥
ॐ प्राणवता शब्दात् ॐ ॥ २.४.१५ ॥
ॐ तस्य च नितयत्वात् ॐ ॥ २.४.१६ ॥
ॐ ते इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॐ ॥ २.४.१७ ॥
ॐ भेदश्रुतेः ॐ ॥ २.४.१८ ॥
ॐ वैलक्षण्याच्च ॐ ॥ २.४.१९ ॥
ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वतः उपदेशात् ॐ ॥
२.४.२० ॥
ॐ मांसादि भौमं यथाशब्दमितरयोश्च ॐ ॥ २.४.२१ ॥
ॐ वैष्यात्तु तद्वादस्तद्वादः ॐ ॥ २.४.२२ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः

॥ इति द्वितीयोऽध्यायः ॥

॥ अथ तृतीयोऽध्यायः ॥

ॐ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः
प्रश्ननिरूपणाभ्याम् ॐ ॥ ३.१.१ ॥

ॐ त्रयात्मकत्वात्तु भूयस्त्वात् ॐ ॥ ३.१.२॥
ॐ प्राणगतेश्च ॐ ॥ ३.१.३॥
ॐ अग्न्यादिगतिश्रुतिरिति चेन्न भाक्तत्वात् ॐ ॥ ३.१.४॥
ॐ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ ॥ ३.१.५॥
ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ ॥ ३.१.६॥
ॐ भाक्तं वानात्मवित्त्वात् तथा हि दर्शयति ॐ ॥ ३.१.७॥
ॐ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॐ ॥ ३.१.८॥
ॐ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजनिः ॐ ॥ ३.१.९॥
ॐ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॐ ॥ ३.१.१०॥
ॐ सुकृतदुष्कृते एवेति तु बादरिः ॐ ॥ ३.१.११॥
ॐ अनिष्टादिकारिणामपि च श्रुतम् ॐ ॥ ३.१.१२॥
ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ ॥ ३.१.१३॥
ॐ स्मरन्ति च ॐ ॥ ३.१.१४॥
ॐ अपि च सप्त ॐ ॥ ३.१.१५॥
ॐ तत्रापि च तद्व्यापारादविरोधः ॐ ॥ ३.१.१६॥
ॐ विद्याकर्मणोरिति तु प्रकृतत्वात् ॐ ॥ ३.१.१७॥
ॐ न तृतीये तथोपलब्धेः ॐ ॥ ३.१.१८॥
ॐ स्मर्यतेऽपि च लोके ॐ ॥ ३.१.१९॥
ॐ दर्शनाच्च ॐ ॥ ३.१.२०॥
ॐ तृतीयशब्दादवरोधः संशोकजस्य ॐ ॥ ३.१.२१॥
ॐ तत्साभाव्यापत्तिरुपपत्तेः ॐ ॥ ३.१.२२॥
ॐ नातिचिरेण विशेषात् ॐ ॥ ३.१.२३॥
ॐ अन्याधिष्ठते पूर्ववदभिलापात् ॐ ॥ ३.१.२४॥
ॐ अशुद्धमिति चेन्न शब्दात् ॐ ॥ ३.१.२५॥
ॐ रेतः सिग्योगोऽथ ॐ ॥ ३.१.२६॥
ॐ योनेः शरीरम् ॐ ॥ ३.१.२७॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
तृतीयाध्यायस्य प्रथमः पादः समाप्तः

ॐ संध्ये सृष्टिराह हि ॐ ॥ ३.२.१॥
ॐ निर्मातारं चैके पुत्रादयश्च ॐ ॥ ३.२.२॥
ॐ मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॐ ॥ ३.२.३॥
ॐ सूचकश्च हि श्रुतेः आचक्षते च तद्विदः ॐ ॥ ३.२.४॥
ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ॥ ३.२.५॥
ॐ देहयोगाद्वा सोऽपि ॐ ॥ ३.२.६॥
ॐ तदभावो नाडीषु तच्छ्रुतेः आत्मनि च ॐ ॥ ३.२.७॥
ॐ अतः प्रबोधोऽस्मात् ॐ ॥ ३.२.८॥
ॐ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ ३.२.९॥
ॐ मुग्धेऽर्धसंपत्तिर्परिशेषात् ॐ ॥ ३.२.१०॥
ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ ॥ ३.२.११॥
ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥ ३.२.१२॥
ॐ अपि चैवमेके ॐ ॥ ३.२.१३॥
ॐ अरूपदेव हि तत्प्रधानत्वात् ॐ ॥ ३.२.१४॥
ॐ प्रकाशवच्चावैयर्थ्यात् ॐ ॥ ३.२.१५॥
ॐ आह च तन्मात्रम् ॐ ॥ ३.२.१६॥
ॐ दर्शयति चाथोऽपि स्मर्यते ॐ ॥ ३.२.१७॥
ॐ अत एव उपमा सूर्यकादिवत् ॐ ॥ ३.२.१८॥
ॐ अम्बुवदग्रहणात्तु न तथात्वम् ॐ ॥ ३.२.१९॥
ॐ वृद्धिह्रासभाक्त्वमन्तर्भावात् उभयसामञ्जस्यादेवम् ॐ ॥ ३.२.२०॥
ॐ दर्शनाच्च ॐ ॥ ३.२.२१॥
ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥ ३.२.२२॥
ॐ तदव्यक्तमाह हि ॐ ॥ ३.२.२३॥
ॐ अपि च संराधने प्रत्यक्षानुमानाभ्याम् ॐ ॥ ३.२.२४॥
ॐ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मणि अभ्यासात् ॐ ॥ ३.२.२५॥
ॐ अतोऽनन्तेन तथा हि लिङ्गम् ॐ ॥ ३.२.२६॥
ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥ ३.२.२७॥
ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥ ३.२.२८॥
ॐ पूर्ववद्वा ॐ ॥ ३.२.२९॥
ॐ प्रतिषेधाच्च ॐ ॥ ३.२.३०॥
ॐ परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॐ ॥ ३.२.३१॥
ॐ सामान्यात्तु ॐ ॥ ३.२.३२॥
ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३.२.३३॥
ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥ ३.२.३४॥
ॐ उपपत्तेश्च ॐ ॥ ३.२.३५॥
ॐ तथान्यप्रतिषेधात् ॐ ॥ ३.२.३६॥
ॐ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॐ ॥ ३.२.३७॥
ॐ फलमतरुपपत्तेः ॐ ॥ ३.२.३८॥
ॐ श्रुतत्वाच्च ॐ ॥ ३.२.३९॥
ॐ धर्मं जैमिनिः अत एव ॐ ॥ ३.२.४०॥
ॐ पूर्वं तु बादरायणः हेतुव्यपदेशात् ॐ ॥ ३.२.४१॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
तृतीयाध्यायस्य द्वितीयः पादः समाप्तः

ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ ॥ ३.३.१॥
ॐ भेदान्नेति चेन्न एकस्यामपि ॐ ॥ ३.३.२॥
ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॐ ॥ ३.३.३॥
ॐ दर्शयति च ॐ ॥ ३.३.४॥
ॐ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ ॥ ३.३.५॥
ॐ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॐ ॥ ३.३.६॥
ॐ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ ॥ ३.३.७॥
ॐ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॐ ॥ ३.३.८॥
ॐ व्याप्तेश्च समञ्जसम् ॐ ॥ ३.३.९॥
ॐ सर्वाभेदादन्यत्रेमे ॐ ॥ ३.३.१०॥

ॐ आनंदादयः प्रधानस्य ॐ ॥ ३.३.११॥
ॐ प्रियशिरस्त्वाद्यप्राप्तिः उपचयापचयौ हि भेदे ॐ ॥ ३.३.१२॥
ॐ इतरे त्वर्थसामान्यात् ॐ ॥ ३.३.१३॥
ॐ आध्यानाय प्रयोजनाभावात् ॐ ॥ ३.३.१४॥
ॐ आत्मशब्दात् ॐ ॥ ३.३.१५॥
ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥ ३.३.१६॥
ॐ अन्वयादिति चेत्स्यादवधारणात् ॐ ॥ ३.३.१७॥
ॐ कार्याख्यानादपूर्वम् ॐ ॥ ३.३.१८॥
ॐ समान एवञ्चाभेदात् ॐ ॥ ३.३.१९॥
ॐ संबंधादेवमन्यत्रापि ॐ ॥ ३.३.२०॥
ॐ न वा विशेषात् ॐ ॥ ३.३.२१॥
ॐ दर्शयति च ॐ ॥ ३.३.२२॥
ॐ सम्भृतिद्युव्याप्त्यपि चातः ॐ ॥ ३.३.२३॥
ॐ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॐ ॥ ३.३.२४॥
ॐ वेधाद्यर्थभेदात् ॐ ॥ ३.३.२५॥
ॐ हानौ तूपायनशब्दात् कुशाच्छन्दस्स्तुत्युपगानवत् तदुक्तम् ॐ ॥ ३.३.२६॥
ॐ साम्पराये तर्तव्याभावात् तथा ह्यन्ये ॐ ॥ ३.३.२७॥
ॐ छन्दतरुभयाविरोधात् ॐ ॥ ३.३.२८॥
ॐ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॐ ॥ ३.३.२९॥
ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेः लोकवत् ॐ ॥ ३.३.३०॥
ॐ अनियमः सर्वासामविरोधश्शब्दानुमानाभ्याम् ॐ ॥ ३.३.३१॥
ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥ ३.३.३२॥
ॐ अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॐ ॥ ३.३.३३॥
ॐ इयदामननात् ॐ ॥ ३.३.३४॥
ॐ अन्तरा भूतग्रामवत्स्वात्मनः ॐ ॥ ३.३.३५॥
ॐ अन्यथा भेदानुपपत्तेरितिचेन्नोपदेशान्तरवत् ॐ ॥ ३.३.३६॥
ॐ व्यतिहारविंशिंषन्ति हीतरवत् ॐ ॥ ३.३.३७॥
ॐ सैव हि सत्यादयः ॐ ॥ ३.३.३८॥
ॐ कामादीरत्र तत्र च आयतनादिभ्यः ॐ ॥ ३.३.३९॥
ॐ आदारादलोपः ॐ ॥ ३.३.४०॥
ॐ उपस्थितेऽतस्तद्वचनात् ॐ ॥ ३.३.४१॥
ॐ तन्निर्धारणानियमस्तद्दृष्टेर्पृथग्ध्यप्रतिबन्धः फलम् ॐ ॥ ३.३.४२॥
ॐ प्रदानवदेव तदुक्तम् ॐ ॥ ३.३.४३॥
ॐ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॐ ॥ ३.३.४४॥
ॐ पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॐ ॥ ३.३.४५॥
ॐ अतिदेशाच्च ॐ ॥ ३.३.४६॥
ॐ विद्यैव तु निर्धारणात् ॐ ॥ ३.३.४७॥
ॐ दर्शनाच्च ॐ ॥ ३.३.४८॥
ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥ ३.३.४९॥
ॐ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत्दृष्टश्च तदुक्तम् ॐ ॥ ३.३.५०॥
ॐ न सामान्यादप्युपलब्धेर्मृत्युवत् नहि लोकापत्तिः ॐ ॥ ३.३.५१॥
ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॐ ॥ ३.३.५२॥
ॐ एकाऽत्मनश्शरीरे भावात् ॐ ॥ ३.३.५३॥
ॐ व्यतिरेकस्तद्भावाभावित्वात् न तु उपलब्धिवत् ॐ ॥ ३.३.५४॥
ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ ॥ ३.३.५५॥
ॐ मन्त्रादिवद्वाऽविरोधः ॐ ॥ ३.३.५६॥
ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॐ ॥ ३.३.५७॥
ॐ नाना शब्दादिभेदात् ॐ ॥ ३.३.५८॥
ॐ विकल्पविशिष्टफलत्वात् ॐ ॥ ३.३.५९॥
ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ ॥ ३.३.६०॥
ॐ अङ्गेषु यथाश्रयभावः ॐ ॥ ३.३.६१॥
ॐ शिष्टेश्च ॐ ॥ ३.३.६२॥
ॐ समाहारात् ॐ ॥ ३.३.६३॥
ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥ ३.३.६४॥
ॐ न वा तत्सहभावाश्रुतेः ॐ ॥ ३.३.६५॥
ॐ दर्शनाच्च ॐ ॥ ३.३.६६॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
तृतीयाध्यायस्य तृतीयः पादः समाप्तः

ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥ ३.४.१॥
ॐ शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ ॥ ३.४.२॥
ॐ आचारदर्शनात् ॐ ॥ ३.४.३॥
ॐ तच्छ्रुतेः ॐ ॥ ३.४.४॥
ॐ समन्वारम्भणात् ॐ ॥ ३.४.५॥
ॐ तद्वतो विधानात् ॐ ॥ ३.४.६॥
ॐ नियमाच्च ॐ ॥ ३.४.७॥
ॐ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॐ ॥ ३.४.८॥
ॐ तुल्यं तु दर्शनम् ॐ ॥ ३.४.९॥
ॐ असार्वत्रिकी ॐ ॥ ३.४.१०॥
ॐ विभागः शतवत् ॐ ॥ ३.४.११॥
ॐ अध्ययनमात्रवतः ॐ ॥ ३.४.१२॥
ॐ नाविशेषात् ॐ ॥ ३.४.१३॥
ॐ स्तुतयेऽनुमतिर्वा ॐ ॥ ३.४.१४॥
ॐ कामकारेण चैके ॐ ॥ ३.४.१५॥
ॐ उपमर्दं च ॐ ॥ ३.४.१६॥
ॐ ऊर्ध्वरेतःसु च शब्दे हि ॐ ॥ ३.४.१७॥
ॐ परामर्शं जैमिनिरचोदना चापवदिति हि ॐ ॥ ३.४.१८॥

ॐ अनुष्ठेयं बादरायणस्साम्यश्रुतेः ॐ ॥ ३.४.१९ ॥
ॐ विधिर्वा धारणवत् ॐ ॥ ३.४.२० ॥
ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ ॥ ३.४.२१ ॥
ॐ भावशब्दाच्च ॐ ॥ ३.४.२२ ॥
ॐ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॐ ॥ ३.४.२३ ॥
ॐ तथा चैकवाक्यतोपबन्धात् ॐ ॥ ३.४.२४ ॥
ॐ अतएव चाग्नीन्धनाद्यनपेक्षा ॐ ॥ ३.४.२५ ॥
ॐ सर्वापेक्षा च यज्ञादिश्रुतेः अश्ववत् ॐ ॥ ३.४.२६ ॥
ॐ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया
तेषामवश्यानुष्ठेयत्वात् ॐ ॥ ३.४.२७ ॥
ॐ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॐ ॥ ३.४.२८ ॥
ॐ अबाधाच्च ॐ ॥ ३.४.२९ ॥
ॐ अपि च स्मर्यते ॐ ॥ ३.४.३० ॥
ॐ शब्दश्चातोऽकामकारे ॐ ॥ ३.४.३१ ॥
ॐ विहितत्वाच्चाश्रमकर्मापि ॐ ॥ ३.४.३२ ॥
ॐ सहकारित्वेन च ॐ ॥ ३.४.३३ ॥
ॐ सर्वथापि त एवोभयलिङ्गात् ॐ ॥ ३.४.३४ ॥
ॐ अनभिभवं च दर्शयति ॐ ॥ ३.४.३५ ॥
ॐ अन्तरा चापि तु तद्दृष्टेः ॐ ॥ ३.४.३६ ॥
ॐ अपि च स्मर्यते ॐ ॥ ३.४.३७ ॥
ॐ विशेषणानुग्रहश्च ॐ ॥ ३.४.३८ ॥
ॐ अतरित्वतरज्ज्यायो लिङ्गाच्च ॐ ॥ ३.४.३९ ॥
ॐ तद्भूतस्य तु नातद्भावः जैमिनेरपि नियमातद्रूपाभावभ्यः
ॐ ॥ ३.४.४० ॥
ॐ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॐ ॥
३.४.४१ ॥
ॐ उपपूर्वमपि तु एके भावमशनवत्तदुक्तम् ॐ ॥ ३.४.४२ ॥
ॐ बहिस्तूभययापि स्मृतेचाराच्च ॐ ॥ ३.४.४३ ॥
ॐ स्वामिनः श्रुतेरित्यात्रेयः ॐ ॥ ३.४.४४ ॥
ॐ आर्त्विज्यमित्यौडुलोमिः तस्मं हि परिक्रीयते ॐ ॥
३.४.४५ ॥
ॐ श्रुतेश्च ॐ ॥ ३.४.४६ ॥
ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतः विध्यादिवत् ॐ
॥ ३.४.४७ ॥
ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ ॥ ३.४.४८ ॥
ॐ मनवदितरेषामप्युपदेशात् ॐ ॥ ३.४.४९ ॥
ॐ अनाविष्कुर्वनन्वयात् ॐ ॥ ३.४.५० ॥
ॐ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥ ३.४.५१ ॥
ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ
॥ ३.४.५२ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
तृतीयाध्यायस्य चतुर्थः पादः समाप्तः

॥ इति तृतीयोऽध्यायः ॥

॥ अथ चतुर्थोऽध्यायः ॥

ॐ आवृत्तिः असकृदुपदेशात् ॐ ॥ ४.१.१ ॥
ॐ लिङ्गाच्च ॐ ॥ ४.१.२ ॥
ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ४.१.३ ॥
ॐ न प्रतीके न हि सः ॐ ॥ ४.१.४ ॥
ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥ ४.१.५ ॥
ॐ आदित्यादिमतयश्चाङ्गे उपपत्तेः ॐ ॥ ४.१.६ ॥
ॐ आसीनस्सम्भवात् ॐ ॥ ४.१.७ ॥
ॐ ध्यानाच्च ॐ ॥ ४.१.८ ॥
ॐ चलत्वं चापेक्ष्य ॐ ॥ ४.१.९ ॥
ॐ स्मरन्ति च ॐ ॥ ४.१.१० ॥
ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥ ४.१.११ ॥
ॐ आ प्रायणात्तत्रापि हि दृष्टम् ॐ ॥ ४.१.१२ ॥
ॐ तदधिगमोत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ
॥ ४.१.१३ ॥
ॐ इतरस्याप्येवमसंश्लेषस्पाते तु ॐ ॥ ४.१.१४ ॥
ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ ॥ ४.१.१५ ॥
ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ ॥ ४.१.१६ ॥
ॐ अतोऽन्यापि ह्येकेषामुभयोः ॐ ॥ ४.१.१७ ॥
ॐ यदेव विद्ययेति हि ॐ ॥ ४.१.१८ ॥
ॐ भागेन त्वितरे क्षपयित्वा संपद्यते ॐ ॥ ४.१.१९ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
चतुर्थाध्यायस्य प्रथमः पादः समाप्तः

ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ ॥ ४.२.१ ॥
ॐ अत एव च सर्वाण्यनु ॐ ॥ ४.२.२ ॥
ॐ तन्मनः प्राणे उत्तरात् ॐ ॥ ४.२.३ ॥
ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ ॥ ४.२.४ ॥
ॐ भूतेषु तच्छ्रुतेः ॐ ॥ ४.२.५ ॥
ॐ नैकस्मिन् दर्शयतो हि ॐ ॥ ४.२.६ ॥
ॐ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥ ४.२.७ ॥
ॐ तदाऽपीतेः संसारव्यपदेशात् ॐ ॥ ४.२.८ ॥
ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ॥ ४.२.९ ॥
ॐ नोपमर्देनातः ॐ ॥ ४.२.१० ॥
ॐ अस्यैव चोपपत्तेरेषोष्मा ॐ ॥ ४.२.११ ॥
ॐ प्रतिषेधादिति चेन्न शरीरात् ॐ ॥ ४.२.१२ ॥
ॐ स्पष्टो ह्येकेषाम् ॐ ॥ ४.२.१३ ॥
ॐ स्मर्यते च ॐ ॥ ४.२.१४ ॥
ॐ तानि परे तथाह्याह ॐ ॥ ४.२.१५ ॥
ॐ अविभागः वचनात् ॐ ॥ ४.२.१६ ॥
ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारः
विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीताः
शताधिकया ॐ ॥ ४.२.१७ ॥
ॐ रश्म्यनुसारी ॐ ॥ ४.२.१८ ॥
ॐ निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च
ॐ ॥ ४.२.१९ ॥
ॐ अतश्चायनेऽपि दक्षिणे ॐ ॥ ४.२.२० ॥

ॐ योगिनः प्रति च स्मर्यते स्मार्ते चैते ॐ ॥ ४.२.२१॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
चतुर्थाध्यायस्य द्वितीयः पादः समाप्तः

ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ ४.३.१॥
ॐ वायुमब्दादविशेषविशेषाभ्याम् ॐ ॥ ४.३.२॥
ॐ तडितोऽधि वरुणः संबन्धात् ॐ ॥ ४.३.३॥
ॐ आतिवाहिकाः तल्लिङ्गात् ॐ ॥ ४.३.४॥
ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ ४.३.५॥
ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ ४.३.६॥
ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥ ४.३.७॥
ॐ विशेषितत्त्वाच्च ॐ ॥ ४.३.८॥
ॐ सामीप्यात्तु तद्व्यपदेशः ॐ ॥ ४.३.९॥
ॐ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॐ ॥ ४.३.१०॥
ॐ स्मृतेश्च ॐ ॥ ४.३.११॥
ॐ परं जैमिनिः मुख्यत्वात् ॐ ॥ ४.३.१२॥
ॐ दर्शनाच्च ॐ ॥ ४.३.१३॥
ॐ न च कार्ये प्रतिपत्यभिसन्धिः ॐ ॥ ४.३.१४॥
ॐ अप्रतीकालम्बनान्नयतीति बादरायणरुभयथाऽदोषात् तत्क्रतुश्च ॐ ॥ ४.३.१५॥
ॐ विशेषं च दर्शयति ॐ ॥ ४.३.१६॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
चतुर्थाध्यायस्य तृतीयः पादः समाप्तः

ॐ संपद्याविर्भावः स्वेनशब्दात् ॐ ॥ ४.४.१॥
ॐ मुक्तः प्रतिज्ञानात् ॐ ॥ ४.४.२॥
ॐ आत्मा प्रकरणात् ॐ ॥ ४.४.३॥
ॐ अविभागेन दृष्टत्वात् ॐ ॥ ४.४.४॥
ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ ४.४.५॥
ॐ चितितन्मात्रेण तदात्मकत्त्वादित्यौडुलोमिः ॐ ॥ ४.४.६॥
ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ ॥ ४.४.७॥
ॐ संकल्पादेव तु तच्छ्रुतेः ॐ ॥ ४.४.८॥
ॐ अत एव चानन्याधिपतिः ॐ ॥ ४.४.९॥
ॐ अभावं बादरिराह ह्येवम् ॐ ॥ ४.४.१०॥
ॐ भावं जैमिनिर्विकल्पामननात् ॐ ॥ ४.४.११॥
ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥ ४.४.१२॥
ॐ तन्वभावे संध्यवदुपपत्तेः ॐ ॥ ४.४.१३॥
ॐ भावे जाग्रद्वत् ॐ ॥ ४.४.१४॥
ॐ प्रदीपवदावेशः तथा हि दर्शयति ॐ ॥ ४.४.१५॥
ॐ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॐ ॥ ४.४.१६॥
ॐ जगद्व्यापारवर्जं प्रकरणात् असन्निहितत्त्वाच्च ॐ ॥ ४.४.१७॥
ॐ प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमण्डलस्थोक्तेः ॐ ॥ ४.४.१८॥
ॐ विकारावर्ति च तथा हि स्थितिमाह ॐ ॥ ४.४.१९॥
ॐ दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥ ४.४.२०॥
ॐ भोगमात्रसाम्यलिङ्गाच्च ॐ ॥ ४.४.२१॥
ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॐ ॥ ४.४.२२॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु
चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः

॥ इति चतुर्थोऽध्यायः॥

भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु